# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**M.A./M.Sc. FIRST SEMESTER EXAMINATION, DECEMBER 2019**

**FIRST YEAR (BATCH 2019-21)**

**SANSKRIT**

**Paper : III (CC3)**

Date : 19/12/2019

Time : 11 am – 1 pm

Full Marks : 50

## Unit-I

१. यथेच्छ**मेक:** प्रश्न: समाधेय:। [१×१५]

क) महाभाष्यस्य भाष्यत्वं महत्त्वं च किंनिबन्धनम् इति व्याख्यायताम्। "अथ शब्दानुशासनम्" इति भाष्यग्रन्थ: व्याख्येय:। २+५+८

ख) "रक्षोहागमलघ्वसन्देहा: प्रयोजनम्" – अत्र उद्देश्यविधेयवैषम्यबीजं प्रदर्श्य व्याकरणाध्ययनप्रयोजनानि प्रकृते प्रस्तुतानि सोदाहरणं व्याख्यायन्ताम्। २+१३

२. यथेच्छ**मेको** ग्रन्थो व्याख्यायताम्। [१×५]

क) दुष्ट: शब्द: स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रु: स्वरतोऽपराधात्।।

ख) व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्।

## Unit-II

३. **एक:** प्रश्न: समाधेय:। [१×१०]

क) दु:खत्रयाभिघाताज्जिज्ञासा तदवघातके हेतौ। इति कारिकांशो व्याख्यायताम्।

ख) असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।। – इति कारिका व्याख्यायताम्।

४. **पञ्च** प्रश्ना: समाधेया:। [५×१]

क) सांख्यकारिका केन विरचिता?

ख) आनुश्रविकशब्दस्य कोऽर्थ: ?

ग) किं व्यक्तम्?

घ) को ज्ञ: ?

ङ) का: प्रकृतिविकृतय: ?

च) सांख्यदर्शने कति प्रमाणानि स्वीकृतानि? कानि तानि?

छ) कति गुणा: ? के च ते?

ज) सांख्यकारिकायां पुरुषास्तित्वप्रतिपादनाय कति हेतव: प्रतिपादिता: ?

झ) कानि कर्मेन्द्रियाणि?

ञ) सांख्यकारिकानुसारं बाह्यकरणं कतिविधम्?

## **Unit-III**

५. यथेच्छ**मेक:** प्रश्न: समाधेय:। [१×५]

क) वेदान्तसारग्रन्थस्य मङ्गलाचरणश्लोकं व्याख्यात।

ख) वेदान्तसारोक्तम् अधिकारिलक्षणं विवृणुत।

६. यथेच्छं **पञ्च** प्रश्ना: समाधेया:। [२×५]

क) को नाम वेदान्त: ? किं नाम शारीरकसूत्रम् ?

ख) सदानन्दयोगीन्द्रस्य गुरोर्नाम किम् ?

ग) प्रकरणग्रन्थस्य किं लक्षणम् ?

घ) नित्यकर्मणाम् अकरणे किं प्रत्यवाय: समुत्पद्यते ? कात्र उपपत्ति: ?

ङ) सोदाहरणम् उपासनालक्षणं लिखत।

च) किं तावत् साधनचतुष्टयम् ?

छ) का नाम श्रद्धा ?

ज) को नाम इहामुत्रफलभोगविराग: ?

झ) वेदान्तसारग्रन्थस्य प्रयोजनं निरूपयत।

ञ) वेदान्तस्य विषय: क: ?

——————— × ———————